# प्रार्थनादशकस्तोत्रम्

रमारमण मध्वादिदेशिकश्रीहृदब्जग ।
हयग्रीव कृपालो मे प्रार्थनां शृणु सादरम् ॥१॥

अयोग्यविषये स्वामिन् सर्वथा न मनो भवेत् ।
चांचल्यं मूलतश्छिन्धि दुराशां हर दूरतः ॥२॥

दुर्बुद्धिं च न मे देहि दुःशास्त्रावर्तने रतिम् ।
हापयस्व च दुर्मानं दुर्गुणं मोचय प्रभो ॥३॥

दुःसंगं दुष्क्रियां छिंधि हर लोकाटनात् पदौ ।
न नियोजय चक्षुंषि परदारादिदर्शने ॥४॥

दुष्प्रतिग्रहदुस्पर्शे करौ मा चोदय ध्रुवम् ।
अगम्यागमने गुह्यं घ्राणमाघ्राणनेऽसताम् ॥५॥

अपकर्षतु जिह्वां मे लोकवार्तादुरन्नतः ।
दुर्वार्तादुष्टशब्देभ्यो निवर्तय हरे श्रुती ॥६॥

भवदिच्छानुगं चेतो योग्यसद्विषयं भवेत् ।
यदृच्छालाभसंतृप्तं निश्चांचल्यं भवेत्त्वयि ॥७॥

सुज्ञानं सर्वदा देहि सच्छास्त्रावर्तने रतिम् ।
सत्संगं सत्क्रियां चैव पादौ त्वत्क्षेत्रसर्पणे ॥८॥

श्रीमध्वशास्त्रश्रवणे नियुंक्ष्व श्रवणे सदा ।
हयास्य चक्षुंषि च मे दर्शने सन्नियोजय ॥९॥

करौ त्वदर्चने नित्यं सुखतीर्थस्य लेखने ।
त्वदालापे त्वदुच्छिष्टभोजने कुरु जिह्विकाम् ॥१०॥

घ्राणं भवतु निर्माल्याघ्राणने नमने शिरः ।
देहि मे तु ज्ञानभक्तिपशुपुत्रधनादिकम् ॥११॥

प्रार्थनादशकं चैतत् त्रिकाले यः पठेन्नरः ।
तस्याभीष्टं हयास्योऽसौ दत्वा रक्षति सर्वदा ॥१२॥